श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुर्विंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशत्यधिकशततमः सर्गः ॥

## भरद्वाजाश्रमेऽवतीर्य श्रीरामेण महर्षेर्दर्शनं ततो वरग्रहणं च

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्॥ **6.124.1** ॥

सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम्।
शृणोषि कच्चिद् भगवन् सुभिक्षानामयं पुरे।
कच्चित् स युक्तो भरतो जीवन्त्यपि च मातरः॥ **6.124.2** ॥

एवमुक्तस्तु रामेण भरद्वाजो महामुनिः।
प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत्॥ **6.124.3** ॥

आज्ञावशत्वे भरतो जटिलस्त्वां प्रतीक्षते।
पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे॥ **6.124.4** ॥

त्वां पुरा चीरवसनं प्रविशन्तं महावनम्।
स्त्रीतृतीयं च्युतं राज्याद् धर्मकामं च केवलम्॥ **6.124.5** ॥

पदातिं त्यक्तसर्वस्वं पितृनिर्देशकारिणम्।
सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम्॥ **6.124.6** ॥

दृष्ट्वा तु करुणापूर्वं ममासीत् समितिञ्जय।
कैकेयीवचने युक्तं वन्यमूलफलाशिनम्॥ **6.124.7** ॥

साम्प्रतं तु समृद्धार्थं समित्रगणबान्धवम्।
समीक्ष्य विजितारिं च ममाभूत् प्रीतिरुत्तमा ॥ **6.124.8** ॥

सर्वं च सुखदुःखं ते विदितं मम राघव।
यत् त्वया विपुलं प्राप्तं जनस्थाननिवासिना ॥ **6.124.9** ॥

ब्राह्मणार्थे नियुक्तस्य रक्षतः सर्वतापसान्।
रावणेन हृता भार्या बभूवेयमनिन्दिता ॥ **6.124.10** ॥

मारीचदर्शनं चैव सीतोन्मथनमेव च।
कबन्धदर्शनं चैव पम्पाभिगमनं तथा ॥ **6.124.11** ॥

सुग्रीवेण च ते सख्यं यत्र वाली हतस्त्वया।
मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च ॥ **6.124.12** ॥

विदितायां च वैदेह्यां नलसेतुर्यथा कृतः।
यथा चादीपिता लङ्का प्रहृष्टैर्हरियूथपैः ॥ **6.124.13** ॥

सपुत्रबान्धवामात्यः सबलः सहवाहनः।
यथा च निहतः सङ्ख्ये रावणो बलदर्पितः ॥ **6.124.14** ॥

यथा च निहते तस्मिन् रावणे देवकण्टके।
समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः ॥ **6.124.15** ॥

सर्वं ममैतद् विदितं तपसा धर्मवत्सल।
सम्पतन्ति च मे शिष्याः प्रवृत्त्याख्याः पुरीमितः ॥ **6.124.16** ॥

अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर।
अर्घ्यं प्रतिगृहाणेदमयोध्यां श्वो गमिष्यसि ॥ **6.124.17** ॥

तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः।
बाढमित्येव संहृष्टः श्रीमान् वरमयाचत ॥ **6.124.18** ॥

अकालफलिनो वृक्षाः सर्वे चापि मधुस्रवाः।
फलान्यमृतगन्धीनि बहूनि विविधानि च॥ **6.124.19** ॥

भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः।
तथेति च प्रतिज्ञाते वचनात् समनन्तरम्॥ **6.124.20** ॥

अभवन् पादपास्तत्र स्वर्गपादपसन्निभाः।
निष्फलाः फलिनश्चासन् विपुष्पाः पुष्पशालिनः॥ **6.124.21** ॥

शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः।
सर्वतो योजनास्तिस्रो गच्छतामभवंस्तदा॥ **6.124.22** ॥

ततः प्रहृष्टाः प्लवगर्षभास्ते
बहूनि दिव्यानि फलानि चैव।
कामादुपाश्नन्ति सहस्रशस्ते
मुदान्विताः स्वर्गजितो यथैव॥ **6.124.23** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
चतुर्विंशत्यधिकशततमः सर्गः॥